शीकरणादिकं निरूप्यते ॥ ॥ सारमुद्धृत्य संक्षेपाद्वशीकरणमोहनम् ॥ कामिनां प्रीतिजनकं किंचिदत्राभिगद्य
ते ॥१॥ तत्रादौ तिलकविधिः ॥ ॥ लज्जालुं मधुकं हव्यं नलिनीमूलमेव च ॥ एतान्पिष्ट्वा स्ववीर्येण यः कुर्यात्तिल
कं पुमान् ॥२॥ तत्क्षणादेव नयति वश्यतां जनसंचयम् ॥ वात्स्यायनेन मुनिना प्रोक्तो योगोयमुत्तमः ॥३॥ सि
तार्कमूलं मंजिष्ठा वचा मुस्तासकुष्ठकम् ॥ स्त्रीयोनिशोणितेनैव एकीकृत्वा ललाटके ॥४॥ भ्रमं तिलकमाद
धेयः स लोकत्रयं क्षणात् ॥ नयति स्ववशं प्राज्ञः सुचिरं मोदते भुवि ॥५॥ तगरं पिप्पलीमूलं मेषशृंगी करंज
जटा ॥ एतत्समं स्वपंचांगमलेनीत्वैकतां सुधीः ॥६॥ मधुना तिलकं कुर्याद्यः क्षोणीसुतवासरे ॥ जगत्सर्वं व
शीकुर्यात्स पुमान्नात्र संशयः ॥७॥ गोरोचनं च संभाव्य स्वपुष्परुधिरेणाया ॥ कुर्यात्तु तिलकं भाले सा पतिं मो
हयेद्ध्रुवम् ॥८॥ अथांजनविधिः ॥ ॥ महाष्टमीदिने यस्तु श्मशानेन रमस्तके ॥ पातितं कज्जलं विश्वं मोह
येन्नयनांजनात् ॥९॥ रोचनाकेशरं कन्याशिलासौभीर्विलोचने ॥ यो जयेद्दृष्टिपथगं सर्वमेव विमोहये
त् ॥१०॥ तालिसकुष्ठतगरैर्लिप्ताक्षोमांसुवर्त्तिकाम् ॥ सिद्धार्थतैलेनिक्षिप्य कज्जलं नरमस्तके ॥११॥

अ॰ र॰
१५

पातयेदंजनान्तस्यसर्वदाभुवनत्रयम् ॥ दृष्टिगोचरमायातिसर्वोभवतिदासवत् ॥१२॥ शिलाकिंजल्कफलिनीरोचना
नांतथांजनात् ॥ प्रध्यार्कयोगेविहितंदंपत्योर्मोहनंपरम् ॥१३॥ अथचूर्णविधिः ॥ ॥ काकजंघासितापक्षो
भ्रामरीकुष्ठमुत्पलम् ॥ मूलंतगरजंचैषांचूर्णीक्षिप्तंविमोहयेत् ॥१४॥ वात्योशिकादलंपंसोमलंमालांशवस्य
च ॥ पक्षावलोरिदंचूर्णीक्षिप्तंशिरसिमोहनम् ॥१५॥ सप्तछदंशिवाख्यंचसक्षोद्रंवसमांशकम् ॥ अमी
षांशिरसिक्षिप्तंचूर्णंमोहकरंपरम् ॥१६॥ अथभक्ष्यणविधिः ॥ ॥ अंगारिसर्वैनिःकासपखंजरीटो
दरंकजे ॥ द्रावयित्वास्ववीर्येणशरावयुगलेक्षिपेत् ॥१७॥ मुद्रांकृत्वातदेकान्तेसप्ताहंधारयेत्सुधीः ॥ प
श्चात्रिःकास्यसंपिष्ट्वावटीकृत्वाविशोषयेत् ॥१८॥ साभक्षणविधानेनदीयमानापरस्परम् ॥ दंपत्यो
र्मोहजननीकीर्तितावटिकोत्तमा ॥१९॥ अथलेपनविधिः ॥ ॥ पःस्वरेतःसमादायरतान्तेसव्यपाणि
ना ॥ वामपादेस्त्रियोलिंपेत्सातस्यवशगाभवेत् ॥२०॥ याभोगशेषेकांतस्यलिंगंवामांघ्रिणास्पृशे
त् ॥ यावदायुर्भवेद्दासःसततस्यानात्रसंशयः ॥२१॥ कपोतविष्ठासिंधूत्थमधुकैस्समभाग

काली
१५

धजो १

कैः ॥ लिप्त्वालिंगंभजेद्दासीववशगा स्याद्वरांगना ॥२२॥ घनसारंसमल्लुकमेढ्रंचमधुनासह ॥ पिष्ट्वालिप्तंयांच
भजेत्सावशगाभवेत् ॥२३॥ रोचनाकनकंशंभुवीजंकर्पूरचन्दने ॥ एभिर्विलिप्तलिंगोयांभजतेसावशाभवे
त् ॥२४॥ अथधूपविधिः ॥ ॥ चन्दनंकुंकुमंव्योबाकामाघंकुसुमंजलम् ॥ देवदारुचसंपिष्यमधुनासह
मिश्रयेत् ॥२५॥ चिन्तामणिरितिख्यातोधूपःपरममोहनः ॥ एषप्रयुक्तोविघ्नानासर्वकार्याणिसाधयेत् ॥
॥२६॥ एलासर्जरससप्ताक्षर्पश्चंदनंयुवतीवशा ॥ भृंगीचैभिस्समैर्धूपात्सर्वंविश्वंविमोहयेत् ॥२७॥ अथका
मेश्वरोमंत्रः ॥ ॥ प्राक्चकामेश्वरेणुक्ताप्रणवादितत्तोमुकीम् ॥ आनयाथानयेत्युक्तावशतांहीततःपद
म् ॥२८॥ अयंकामेश्वरोमंत्रःकदम्बकुसुमैस्सह ॥ पलाशकुसुमैर्वापिसंजप्तोयुतसंख्यया ॥२९॥ तथा
दशांशहोमेनसर्वसिद्धिप्रदःस्मृतः ॥ अनेनजपपुष्पादिदत्तंपरममोहनम् ॥३०॥ अथचामुण्डामंत्रः
॥ ॥ ओं चामुण्डेमोहयाथैनांवशतांनयचामुकीम् ॥३१॥ स्वाहापदान्तइत्युक्त्वाचामुण्डामंत्रउत्तमः ॥ अ ॥
पलाशकुसुमैरेनंलक्षंजपूत्वादशांशतः ॥ होमेनवामविधिनासर्वसिद्धिंप्रविन्दति ॥३२॥ मंत्रोशोपि

अ.र.१.
१६

रजस्तानि सप्तधा कुसुमानि च ॥ एतानि वशगां कुर्यात्कामिनीं नात्र संशयः ॥ ३३ ॥ अथ पद्मिनी वशीकरणम् ॥
कामेश्वर पदं पूर्वं मोंकारादि विमोहय ॥ स्वाहान्तं क्रमतो मंत्रं नागवल्लीदले लिखेत् ॥ ३४ ॥ पुष्पेण मधुयु
क्तेन रविवारेभिमंत्रितम् ॥ सा तेन दीयमानेन पद्मिनी वशतां नयेत् ॥ ३५ ॥ अथ चित्रिणी वशीकरणम्
॥ ॥ ॐकारद्वितयं प्रोक्त्वा विहंगमपदद्वयम् ॥ कामदेवाय तस्मै च स्वाहेत्यस्त्रं मनोभवः ॥ ३६ ॥ पिष्ट्वा जा
तीफलं रंभामूलतोयेन भावयेत् ॥ संशोष्य भानुकिरणैर्नागवल्लीदले क्षिपेत् ॥ ३७ ॥ निमंत्र्यानेन मंत्रेण रवि
विवारे प्रदापयेत् ॥ एतद्भक्षणमात्रेण चित्रिणीं वशमानयेत् ॥ ३८ ॥ अथ शंखिनी वशीकरणम् ॥
ॐ नमो नन्त श्रो मिति च स्वाहान्तं च पदद्वयम् ॥ अयं महासिद्धमंत्रः कीर्तितः पूर्वसूरिभिः ॥ ३९ ॥ मंत्रेणानेन
संजप्य मूलं तगरसंभवम् ॥ श्रीफलैव संघ्या शंखिनी वशतां नयेत् ॥ ४० ॥ अथ हस्तिनी वशीकरणम् ॥
ॐकारो द्विरिप्युग्मं च कामदेवायवेत्यथ ॥ तस्मै स्वाहेति कथितो मंत्रश्रेष्ठो मुनीश्वरैः ॥ ४१ ॥ कपोतवि
ष्ठं सपिष्य मधुनाथ विमिश्रयेत् ॥ मंत्रेणानेन तद्दानाद्धस्तिनी वशगा भवेत् ॥ ४२ ॥ अथांगरागादिकम् ॥

काली
१६

संमूर्छितानुरागाणां रत्युत्सवविलासिनाम् ॥ कामिनां प्रीतिजननमंगरागादिकं ब्रुवे ॥ ४३ ॥ चन्दनोशीरण पा
त्रिलोध्राम्रत्वक्समुद्भवः ॥ लेपः स्वेदजदौर्गन्ध्यं हरत्याशु विलासिनाम् ॥ ४४ ॥ पथ्यानिंबदलं लोध्रं दाडिमी
सप्तपत्रयोः ॥ वल्कलश्च प्रलेपोयमंगदुर्गंधनाशनः ॥ ४५ ॥ चिंचाफलं करंजस्य वीजैर्युपहरीतकी ॥ वि
ल्वमूलेन कक्षादिदुर्गंधिहरणं वमः ॥ ४६ ॥ नागपुष्पागुरूशीरकोलमज्जांबुचन्दनैः ॥ लिप्तांगं विनि
हन्त्याशु दुर्गंधं घर्मवारिजम् ॥ ४७ ॥ त्वांगपीलुतरोः पुष्पं तथा जंबूफलं समम् ॥ एतद्देहे निदाघेषु लिप्तं
घर्मांबुनाशनम् ॥ ४८ ॥ पिचुमंददलांभोजलोध्रदाडिमवल्कलैः ॥ निदाघकाले लिप्तांगं घर्मवारि वियंत्र
येत् ॥ ४९ ॥ शिरीषकेसरोशीरलोध्रैरंगाविरूक्षणागात् ॥ तद्भक्षणाच्च घर्माम्बु निदाघे नैव जायते ॥ ५० ॥
अथ स्नानीयसुगंधिविधिः ॥ ॥ विल्वपत्रं मरुवकमशोककुसुमानि च ॥ क्रमात्पुष्पाणि केतक्याः क्षिप्तानि
ले निधापयेत् ॥ ५१ ॥ आतपे भस्मपुष्पाणि ततो निःकाशयेन्नरः ॥ महापरिमलं तैलं स्यात्तं योग्यं विलासिनां ।
एलां मुद्गनखस्पर्गमांसी कर्पूर पत्रकैः ॥ स्नातासुगंधं परमं सूईजानां दिने दिने ॥ ५३ ॥ धात्री स्वर्ण घनोशी

रपथ्यामांसीविलेपनैः॥ लालामासार्द्रमाचत्तेकेशसौरभ्यमुत्तमम्॥ ५४॥ अथसामान्यसुगंधः॥ ॥चन्दनैला
मदीपत्रशीघ्रपथ्यांबुतोयदैः॥ सामलैर्लेपउक्तोयंसुगंधःकामिवल्लभः॥ ५५॥ कर्पूरंकुंकुमंलोध्रंस्पौरो भेमाकुंहो २
यजलमंबुदः॥ उशीरश्चसमैरेभिर्लेपस्स्यात्सुरभिःपरः॥ ५६॥ पत्रामुस्तचन्दनोशीरकृष्णागुरुसमुद्भवः॥
लेपःकृतोयमंगेषुसौरभ्यंपरमंदिशेत्॥ ५७॥ अथसर्वोत्तमसुगंधः॥ ॥कस्तूरीनागकुसुमंशैलेयंचन्द
नंघनम्॥ श्रीवासःकनकश्चन्द्रोजातीस्पौरोयरतिकम्॥ ५८॥ सुश्लिष्टपिष्टैरेभिस्तुनागवल्लीद
लोद्भवैः॥ रसैर्लेपःसुगंधोयमुक्तोयोग्योमहीभुजाम्॥ ५९॥ स्यात्तोयदस्यभागेकंपथ्याभागचतुष्ट
यम्॥ व्याधिस्पौरोयचन्द्राणाम्प्रत्येकंभागयुग्मभवेत्॥ ६०॥ शिलाभजस्यपंचस्युर्नवभागानखस्य
च॥ एभिरुक्तःसुगंधोयंकस्तूरीदलसंज्ञकः॥ ६१॥ नखपथ्याभयांभोदमांसीसीसकरंजिका॥ स
माःस्वर्णाभसोरुक्तंप्रत्येकंभागयुग्मकम्॥ ६२॥ कर्पूरागुरुकस्तूरीजातीस्पौरोयकस्यतु॥ भागाश्री
कंस्यात्प्रत्येकंसर्वैरेभिरिहोच्यते॥ ६३॥ लेपःसौरभगर्भाख्यःसर्वलोकमनोहरः॥ भूभुजामेवयो
ग्योयमन्येषांदुर्लभःपरः॥ ६४॥ अथमुखवासविधिः॥ ॥लवंगपत्रैलानखस्वर्णजातिभिःफ

रयेद्घटीम्॥ ताम्बूलयुक्तांसामुत्त्कावक्रेमुखमितांनयेत्॥ ६५॥ केसरंकोलमज्जाचस्पौरोयंजातिचन्दनम्॥ वटिकाव
त्नेनेषांकृतानक्रे सुवासयेत्॥ ६६॥ मरावकिंजल्ककुष्ठानां चूर्णं लीढ्वादिसंध्ययोः॥ कर्पूरगंधवदनंकुर्यान्मासा
र्द्धतोध्रुवम्॥ ६७॥ कांबोजीवीजकुष्ठोत्थंचूर्णंमधुघृतान्वितम्॥ योलेढिमासंतद्वक्त्रेकेतकीगंधवद्भवे
त्॥ ६८॥ आम्रपत्राणिसक्षारंमार्गवृक्षभवंक्षिपेत्॥ तंशोष्यभाजकिरसोभक्षेत्ताम्बूलमध्यगम्॥ ६९॥ प्रातःप्रति
दिनंयत्तुसुगंधिस्यात्तदाननम्॥ सर्वेषुमुखवासस्ययोगेष्वयमनुत्तमः॥ ७०॥ ॥इत्यनंगरंगेचरीकरणानु
गंधादिनिरूपणंनामसप्तमंस्थलम्॥ ७॥ ॥अथविवाहोद्देशः॥ ॥विद्याशौर्यविवेकधैर्यसहितेश्रुत्रे
यधर्मस्थितेविख्यातेधनधान्यवैभवयुतेजातासमानेकुले॥ कन्यादोषविवर्जितागुणवतीसभ्रातृकासुन्द
रीसद्भिःशास्त्रविधानतःस्मरकलायोग्याविवाह्यासदा॥ १॥ अथकन्यालक्षणानि॥ ॥नीलाम्भोरुहपत्रका
न्तिरथवास्वर्णप्रभासुन्दरीमत्तेभगामिनीलदीर्घेरुहाशशिमुखीसारंगशावेक्षणा॥ स्याद्यस्यास्तिलकप्रसूनसदृ
शीनासासुदन्तावलीसुश्रोत्रापिकभाषिणीतुजलदश्रीवाथविंबाधरा॥ २॥ वक्राधंकितशीणपाणि

अ॰ रं॰ रणाक्षामोदरीस्वल्पमुकुरंभास्तंभमनोरमोरुयुगलाक्रोश्यादृहत्यांचिता ॥ नाभ्यां चैवसुनिम्नगा गजगतिः
१८ शन्तालपानिद्रान्विताशीलाख्यासुकुमारिकानरवरैःकन्याविवाह्याशुभा ॥७॥ अथ कन्यादूषणानि ॥ ॥ कू
रा पिंगलकेशा लोचनवती खर्वातिदीर्घाकृशालंबोष्ठी पृथुकंधरातिबहुभुक् स्पामाधरादंतुरा ॥ वाचाली वि
षमस्तनी द्रुतगतिः भ्रूयुग्मवाः कोपिनी रूक्षापल्लवजिह्विकातिकठिना सश्मश्रुकालोमशा ॥४॥ निद्रा
शोकवती सदाथचलनेयस्याः प्रकंपोधरो हास्येचापितरंगितो ऽङ्गभवनोगल्होभ्रं शं चंचला ॥ अंगुष्ठाद
धिकाभवेत्तदुपगा यादेतथानामिका सास्यानोधरणीस्पृशेदथभवेन्मध्यानुहीनाग्रका ॥५॥ अज्ञातापि
रिपक्षिभूरुहनदीनक्षत्रसंज्ञाचयाप्रौढा रोगसमाकुलाच शबलभ्रूवल्लरी निस्त्रपा ॥ गंडे कूपयुगान्वि
तो विदधतीहीनाधिकांगी तथा दुःशीलाच विवाहकर्मणि सदा त्याज्या ऽबला पण्डितैः ॥६॥ अथवरल
क्षणानि ॥ ॥ विद्याशौर्यधनाश्रयोगुणनिधिः ख्यातोथवासुन्दरः साचारः सुकुलोद्भवो मधुरवाक्दाना काली
द्यासागरः ॥ भोगाभूरिकुटुंबवान् स्थिरमतिः पापाद्भीतो बली जामाता परिकीर्तितः कविवरैरेवं वि १८

धः सत्तमः ॥७॥ अथवरदूषणानि ॥ ॥ वृद्धो दुर्व्यसनो दयाविरहितो रोगी महापापवान् षण्ढो दुष्कुलोद्भवश्च
विष्णुनो धूते निवृत्तस्पृहः ॥ दारिद्र्यः कुपणोतिचंचलमतिर्नित्यप्रवासी ऋणी भिक्षुः स्नेहविवर्जितः सुमति
भिः कार्यो वरो नेदृशः ॥८॥ अथ परस्त्रीगमननिषेधः ॥ ॥ आयुः क्षतिर्विफलता नृपहास्यता वनिन्दार्थहा
नि लघुता विगतिः परत्र ॥ स्यादेवमप्यपि रतेन परांगनायाः प्राकृतस्थाप्यनयमित्यपि कारणेन ॥९॥ लंकेश्वरो
जनकजाहरणेन वाली तारापहारकृतया प्यथकीचकाख्यः ॥ पांचालिकाग्रहणतो निधनं जगाम तत्त्वेतसा
पि परदाररतिं न वांछेत ॥१०॥ अथ कारणवशात् परस्त्रीगमनस्यानिंद्यत्वमुच्यते ॥ ॥ दृष्टिः प्रेमपराश्रमो
यमनसि प्रोक्तोपसंकल्पकीनिद्राच्छित्तिरतः शरीरतनुता लज्जाविनाशस्ततः ॥ वैराग्यं विषयेषु योनिग
दितस्योन्माद मूर्छितो मृत्युः स्यादिति पंडितैः स्मरदशाउक्ता दशैताः क्रमात् ॥११॥ उर्वशीसुरतचितया
प्ययोसंक्षयं किल पुरूरवान्पः ॥ रक्षणाय निजजीवितस्य तत्संभजेत्परवधूं न कामतः ॥१२॥ नारीयौन
नयौवनाभिलषितं कानंन सेदा पुयाद् उन्मादं मरणं च विंदति सदा कन्दर्प संमोहिता ॥ संचिन्त्येति समागतो

अ॰रं॰ परवधूं रत्यर्थिनी स्वेच्छया गच्छेत्क्वापि न सर्वदा सुमतिमानित्याह वात्स्यायनः ॥१३॥ आपि द्विजश्रोत्रियभूपमित्रसं

१९ बंधिभार्याः प्रदिपंच भुक्ता ॥ स्पृष्टा त्वद्दोषायन चेत्प्रगच्छेद्द्विनौ पुमान्कामतएव नैवम् ॥१४॥ अथागम्याः स्त्रिय

उच्यन्ते ॥ ॥कन्या प्रव्रजिता सती रिपुवधूर्मित्रांगना रोगिणी शिष्या ब्राह्मणवल्लभा च पतितोन्मत्ता च संबंधि

नी ॥ वृद्धाचार्यवधूश्च गर्भसहिता ज्ञाता महापापिनी पिंगा कृष्णतमा सदा बुधजनैस्त्याज्या इमा योषितः ॥

१५॥ अथ दूतीलक्षणम् ॥ ॥मालाकारवधूर्नटी रविधवा धात्री सखी शिल्पिनी सैरंध्री प्रतिगेहिका थरजकी

दासी च संबन्धिनी ॥ बालाप्रव्रजिता च भिक्षुवनिता तक्रस्य विक्रेयिका मान्या कारुवधूर्विदग्धपुरुषैः प्रेष्या

इमा दूतिका ॥१६॥ अथ सुखसाध्यालक्षणम् ॥ ॥निर्लज्जा विधवा कलासु कुशला गोष्ठीपरा दुर्भगा कीवस्य

लकठोरवामनजरद्वेष्य भार्याः स्त्रियाः ॥ धारावस्थितिशीलिका ति चपलावंध्या महामानिनी प्रत्याख्यातरता

महाविरहिणी साध्या सुखेनांगना ॥१७॥ अथानुरागिणीलक्षणम् ॥ ॥लज्जां न धत्ते मिमुखं च पश्येत्

हास्येन भूमिं विलिखेत्स्थिता वा ॥१८॥ व्यनक्ति गात्रं कुरुते व्यंगं दृष्टा कयाक्षं नयनेविदध्यात् ॥१९॥ काली

१९

स्पष्ट्वा स्फुटं सस्मितमेव वाक्यं शनैर्व्रजेत्सानुचराख्यजनाम् ॥ विलोकयन्तं व्याजकथाप्रसंगा दुःखैव दीर्घं स्वं परिदर्शयन्ती

॥१९॥ तन्मित्रवर्गे प्रणायं विदध्यादित्यादि वार्त्तामिसकृच्छ पृच्छेत् ॥ कति स्त्रियो स्यालयगाः सुरूपाः कस्यामयं प्रे

मभरं विधत्ते ॥२०॥ प्रद्रा निदृष्ट्वा स्वकुचं करेण संस्फोटयेदंगुलिकाः सजंभम् ॥ भूषाविहीना न ददाति तस्मै

संदर्शनं याचितमप्यजस्रम् ॥२१॥ पुष्पादिना हंति तथाप्ति तारं संकाशयेन्मार्ष्टि भुजं करेण ॥ व्याजेन गच्छेत्सप

नंकरां [illegible] घर्मा [illegible] वहे द्विलोक्य ॥२२॥ इत्यादिचिह्नै रनुरागयुक्तां ज्ञात्वा विदग्धां मृगशावकाक्षीम् ॥

संप्रेषयेत्तां प्रति निर्विशंको दूतीं त्वरां कामकलाप्रवीणाम् ॥२३॥ अथ दुःसाध्यालक्षणम् ॥ ॥ भर्त्तृस्नेहवती

दृष्टैकवनिता प्रेमणाविहीना भृशं सेर्ष्या भूरिसुताऽत्र पाभरयुता गुर्वादिभीतिस्थिता ॥ प्रायेणार्थवती तथा परजनालापे

विरक्ता सदा निर्लोभा व्यभिचारकर्मणि बुधैर्दुःखेन साध्या स्मृता ॥२४॥ अथ परतौ त्याज्यस्थानानाम् ॥ ॥ वह्निब्राह्मण वमर ३

राजन्यवर्गनिकटे न धान्य देवालये दुर्गादेव चतुष्पथे परगृहे रम्ये श्मशाने ऽपि च ॥ संक्रान्तौ शशिसंक्षये च दार

दिग्नौ कोज्वरार्तै व्रते संध्यायां च परिश्रमे प्रसूतं कुर्यान्न विद्वान्क्वचित् ॥२५॥ इति त्याज्यस्थानावसरम् ॥ ॥

अ॰र॰ अथविहितप्रदेशः॥ ॥विस्तीर्णेललितेसुधाधवलितेचित्रादिनालंकृते रम्येप्रोन्नत चत्वरेऽगुरुमहाधूपादि
२० प्रष्याञ्चिते॥ संगीतांगविराजिते स्वभवनेदीपप्रभाभासुरे निःशंकंसुरतंयथाभिलषितं कुर्यात्समंकान्तया॥
२६॥ ॥इतिश्रीमल्लाडखानमनोविनोदायमहाकविकल्याणमल्लविरचितेनंगरंगेविवादिउद्दे
शनिरूपणन्नामअष्टमंस्थलम्॥८॥ ॥अथबाह्यसंभोगविधिः॥ ॥प्रतिमान्नुपभोगपूर्वकंसुर
तंविदधीतकान्तया॥ परिरंभणमेवपण्डितैः प्रथमंतेषुनिगद्यते दशधा॥१॥वृक्षाधिरूढं तिलतण्डुलाख्यंला
लाटिकंजाघनविद्धकेच॥ ऊरूपगूढंहृयदुग्धनीरेतन्नार्यामष्टमंवल्लरिवेष्टितंस्यात्॥२॥अथपरिरंभ
णलक्षणानि॥ ॥चरणकमलमेकेनांघ्रिणाक्रम्यभर्तुरपरपदसरोजेनाश्रयन्तीतदूरूम्॥तरुमिवभुज
वल्ल्यापीडयन्तीनतांगीकथितमिहमुनीन्द्रैस्तद्द्रुमारूढम्॥३॥भुजयुगलविपर्ययमिथोघटयेज्ञोमि
थुनंमनिश्चलम्॥तिलतंडुलमित्रकंतदापरिरंभकथयन्तिसूरयः॥४॥मिथोललाटाक्षिकपोलवक्त्र
वक्षःकुचवल्लीमिथुनंघटेत॥रसान्तिरेकाद्यदिनिस्तरंगंलालाटिकंतंप्रवदंतिसन्तः॥५॥जघनपरिरं काली
२०

हृया॥परिपीड्यविधुंव्यन्त्यातिकथितंतद्धिसमीहसंज्ञकम्॥२१॥अथनखदानाभिधानम्॥ ॥ग्रीवाकरोरुजघन
स्तनपृष्ठिकक्षाहृत्पार्श्वगण्डगलकेनखराः स्वराःस्युः॥ मानेनवीनसुरतेविरहेप्रवासे द्रव्यक्षयेपविरतौचमदे
प्रयोज्याः॥२२॥नीरेखतानिर्मलतोज्ज्वलत्वंवर्धिष्णुतात्वस्फुटितत्वमेव॥अमाद्दवंचेतिगुणान्नखानांबुधैः
षड्युक्ताःकिलकामशास्त्रे॥२३॥अव्यक्तरेखंकृतरोमहर्षंसमर्पितंगण्डकुचाधरेषु॥पत्कर्मसंपूर्णनख
प्रभूतं विज्ञास्तदेवच्छुरितंवदन्ति॥२४॥ग्रीवाकुचेवक्रनखप्रहारोदत्तोर्द्धचन्द्राख्यइदीरितोसौ॥इत्येवम
थाभिमुखंप्रयुंज्यात्तदाबुधामंडलकंवदन्ति॥२५॥द्वित्र्यंगुलादधिकएषनखप्रहारोमूर्द्धोरुगुल्फकुचदेशस
मर्पितोयः॥रेखाह्वयंमदनकेलिकलाविधिज्ञाः प्राहुस्तमेवतरुणीहितनखस्वभावम्॥२६॥कृताकुचा
र्वनखैरधस्तात्अंगुष्ठमाधायनखंचकाग्रे॥मयूरपादंकिलतंवदन्तिदाशशप्लुतंसर्वनखैःकुचाग्रे॥२७॥
रेखात्रयंपदाष्टकुचेथगछेकृतंभवेदुत्पलपत्रवत्धरे॥अन्वर्थसंज्ञंजवदन्तितद्धिस्मर्तुप्रवासावसरेदिशांति॥

अ.रं.
२१

लेनकान्तः ॥ सानैवमुच्चैदितिको पयुक्तास्याच्चुंबनंनान्मिलितगभिधानम् ॥१३॥ दयितस्पानिवेदप वक्त्रके निजवक्त्रंप
रिचुंवितोधरमु ॥ नपिवेदवलाप्रकाममतो स्फुरिताक्षं किलचुंवनंतदा ॥१४॥ करेणकान्तस्यनिमील्यनेत्रे जिह्वा
मुखान्तर्विनिधाययत्र ॥ चुंवे द्विलोला परिमीलिताक्षीतद्घट्टिकाख्यंकवयोवदन्ति ॥१५॥ करेणकान्ताच्चिवुकं
गृहीत्वादृशोन्पातिः पश्चिमभागवर्त्ती ॥ प्रियाधरं यत्रन्निर्यगारव्याप्रोतं कवीन्द्रैः खलुचुंवनंतत् ॥१६॥ दन्तोर्ग
हीत्वा मदनार्त्तिलोलाधरंविचुंव्याभ्यद्दन्तोस्वभर्तुः ॥ कान्तस्तदीयं काथितं मुनीन्द्रैरितिपुरीछंपरिचुंवनं हि ॥१७॥ त ५
आघायवदनच्छद्मामुपल्यः करांगलीसंपुटकेननारी ॥ जिह्वाग्रदेशेनघट्टिकद्दशोव्रतच्चुंवनंपाडितसंज्ञितं
स्यात् ॥१८॥ प्रियामुखंस्याधरसंपुटेनापिवेत्पतिःसापितथैवभर्तुः ॥ तत्संपुटाख्यंहनुवक्त्रसंज्ञंस्यात्केलि
जिह्वानमतस्तदेव ॥१९॥ संप्राप्य निद्रांरहसिस्वकान्तांविरागतश्चुंवतियत्रभर्ता ॥ प्रोक्तंकवीन्द्रैः प्रति
वोधसंज्ञं तच्चुंवनं सर्वरसातिरेकम् ॥२०॥ अधरोष्ठयुगेन कामिनीपतिवक्त्रोष्ठयुगंसजि काली

परस्परं प्रेमरसातिरेकात्तच्चुंवनं संपुटनामधेयम् ॥ ३

२१

ह्वया ॥ परिपीय विचुंवयन्त्यतिकथितंतद्विसमीष्टसंज्ञकम् ॥२१॥ अयनखदानाभिधानम् ॥ ॥ ग्रीवाकरोरुजघन
स्तनपृष्ठिकक्षाहृत्पार्श्वगण्डगलकेनखराः खराः स्युः ॥ मानेनवीनसुरतेविरहेप्रवासेद्रव्यक्षयेपाविरतौ च मदे
प्रयोज्याः ॥२२॥ नीरेखतानिर्मलतोज्ज्वलत्वं वद्धिस्तुता लक्षुटितत्वमेव ॥ अमाद्दवंचेतिगुणान्नखानांवुधैः
प्रयुक्ताः किलकामशास्त्रे ॥२३॥ अव्यक्तरेखं कृतरोमहर्षंसमर्पितं गंडकुचाधरेषु ॥ पत्कर्मसंपूर्णनख
प्रभूतं विज्ञास्तदेवच्छुरितं वदन्ति ॥२४॥ ग्रीवाकुचेवक्रनखप्रहारो दन्तोर्द्धचन्द्राख्यडुदीरितोसौ ॥ द्वयेवमे
वाभिमुखंप्रयुंज्यात्तदाबुधामंडलकंवदन्ति ॥२५॥ द्विन्यंगुलादधिकएषनखप्रहारो भूर्द्धोरुगुल्फकुचदेशसा(?)
मिर्पितोयः ॥ रेखाद्वयंमदनकेलिकलाविधिज्ञाः प्राहुस्तमेवतरुणीहिनखस्वभावम् ॥२६॥ कृताकुचासे
र्वनखैरधस्तात् अंगुष्ठमाधायनखेनकाग्रे ॥ मयूरपादं किलतंवदन्ति दाराशुपुतंसर्वनखैः कृत्वाग्रे ॥२७॥
रेखात्र्यंपदृष्टकुवेथगच्छेकृतं भवेदुत्पलपत्रवद्यत् ॥ अन्वर्थसंज्ञं प्रवदन्तितद्विसार्धप्रवासावसरे दिशंति ॥

अ॰रं॰
२२

॥२८॥ नखंप्रयुक्तं प्रणयाद्रमज्ञेयं देतद्देवास्तिमनोभवस्य॥ सर्वस्य मत्पन्न सुखैक हेतुर्नातोस्ति किं चिद्वर कामिनीनाम्॥
२९॥ अथ दशनविधिः॥ ॥ नखप्रदेशेषु रदाः प्रयोज्याशु श्यानतान्तं नयनानि हित्वा॥ हीकार सीत्कार विशेषबद्ध
कोदन्तार्पणेकामकलाप्रवीणैः॥३०॥ रागस्फुरत्स्निग्धतराः समानाघ छाश्च सूक्ष्माः शिखराः सभासः॥ दं
ष्टकं बिंदुः॥ दशनच्छदं गण्डपीडनादि दमच्छूनकमुच्यते बुधैः॥३२॥ दंतौष्ठयोगेन विशेषसाध्यः प्रवा
ल पूर्वो मणिरेषयुक्ताः॥ अभ्यास योगेन च दंपतीभ्यां संसाध्यते नान्य विनोदिनस्तु॥३३॥ अधरेतिलकेच का
मिनां दद्युगेनाविखण्डने कृते॥ इति बिन्दुरुदीरितोरविलैर्दशनस्यात्किल बिन्दुमालकः॥३४॥ कपोल व
क्षोगल भाल देशे खण्डाभ्रकं स्याद्दशनाग्रलेख्यम्॥ तन्मण्डलाकारकमंग नानामंगे बुधैः भालभतोनिता
नाम्॥३५॥ अखर्वसांद्रा दशनावलीया कान्ता शरीरे क्रियते च भर्त्रा॥ प्रस्थानकाले स्मृतिहेतुभूतात
त्कोलचंचं प्रवदन्ति विज्ञाः॥३६॥ ॥ अथ केशग्रहणोद्देशः॥ ॥ स्निग्धा घनाः कुंचित नीलवर्णाः काली
२२

केशाः प्रशस्तास्तरुणीजनानाम्॥ प्रेमप्रकर्षे विधिनैव मन्दं ग्राह्यानरैश्चुंबनदानकाले॥३७॥ विकृष्य तान्परिकर्षणं च वति
करयुग्मेन पतिः प्रियां यदि॥ समहस्तकमित्यथैकतो यदि हस्तेन तरङ्गरंगकः॥३८॥ परिवेष्ट्य करेण कुन्तलान्मद
नार्तो यदि धारयेत्प्रियम्॥ रतिकेलिकलापकोविदाः कथयंतीति भुजंगवल्लिकाम्॥३९॥ करौ प्रदेशस्य कृत्वा
न्तविगृह्य परस्परं वर्तियत्र नारी॥ पतिश्च तथा सुरतावतारे कामाव स संसकच ग्रहस्स्यात्॥४०॥ इति प्रदिष्टाः कति
चित्प्रसिद्धाः क्रमान्यथा वा सुरत प्रकाराः॥ प्रसिद्धभावाव कुशो परेऽत्र न दर्शितास्ति स्तरतां कपाते॥४१॥ ॥
द्रुपनंगरंगे वा हसंभोगानि रूपयन्नामननवमस्य लभ्॥९॥ ॥ अथ सुरतभेदानिरूप्यन्ते॥ ॥ साम्यानुरूपा
स्रविधाय पूर्वविज्ञः प्रमान्त्वाघ्रतो प्रचारान्॥ विधिश्लथीभूतवरांगदेशान्भजेत कान्तां स्मरकेलिरंगे॥१॥
प्रौढापि नारीश्लथतामुपैतिप्रसारणाद्दूरुयुगस्य सद्यः॥ अपिश्लथा संयमितो रुयुग्मागच्छेद्दृढत्वं सुरतप्र
योगे॥२॥ उत्तानकं तिर्यगथोस्थितात्वोपविष्टं नम्रं ध्यानतकं रतज्ञैः॥ पंचप्रकारं सुरतं वदन्तितस्य प्रभेदान्क
मतो ब्रवीमि॥३॥ तत्रादावुत्तानबंधः॥ ॥ निधाय पादौ रमणांसयोश्चे दुत्तानसुप्तार्मतेप्ररंध्री॥ रति प्रबंधेसे

अनं.
२२

मपादसंज्ञं प्रोचुस्तदाभोगविधानदक्षाः ॥४॥ उत्तानितायाः स्मरमंदिरोपस्थितस्तदूरुद्वयमुद्गृहीत्वा ॥ संस्थाप्य पा
र्श्वे कटितो रमेत कान्तस्तदा स्यात्किल नागराख्यः ॥५॥ स्त्रियोंघ्रिमेकं विनिधाय भूमावन्यं स्वमौलौ निज पाणि
युग्मम् ॥ पद्मासनं समाधाय रमेत भर्त्रा त्रैविक्रमाख्यं करणं तदा स्यात् ॥६॥ तल्पेऽनुसुप्ता निज पादयुग्ममू
र्ध्वं विधत्ते रमणी कराभ्याम् ॥ स्तनौ गृहीत्वा पुरुषो भजेत कान्तो बंधस्तदा व्योमपदाख्य उक्तः ॥७॥ कान्तो हृद
यान्तरगस्त्वहस्तौ निधाय भूमौ रमते पतिश्चेत् ॥ बंधस्तदोक्तः स्मरचक्रनामा श्रेष्ठस्सदा कामिजनस्य लो
के ॥८॥ नारी स्वपादौ दयितस्य वक्षःस्थितौ समालिंग्य करद्वयेन ॥ किंचिन्नतोऽसौ रमते तदासौ प्रोक्तो मुनी
न्द्रैरवदारिताख्यः ॥९॥ उत्तानितोरुद्वयमध्यगामी घट्टं समालिंग्य भजेत यत्र ॥ कान्तो विलासि प्रियस
वबंधः सौम्याख्य उक्तः कविभिः पुराणैः ॥१०॥ ऊरुयुग्मं वक्रमुद्दंचितं च कृत्वांबुजाक्षी भजते पतिं चे
त् ॥ आनन्दकन्दैः तरुणीजनानां बंधो यमुक्तः किल जृंभिताख्यः ॥११॥ कान्तोरुयुग्मं परिवेष्टितं चे

काली
२२

न्निः पीडकामाकुलचित्तवृत्तिः ॥ रमेत भर्त्रा यदि वेष्टिताख्यं तदोत्तिबंधं मुनयो वदन्ति ॥१२॥ स्कंधप्रदेशे विनिधा
य जंघामेकां स्त्रियोऽन्यामथ संविदार्य ॥ अधोविनीय प्रबलं रमेत भर्त्रा यदा वेणुविदारितं तत् ॥१३॥ विला
सिनी संगतमूरुयुग्मं कृत्वोर्ध्वमालिंग्य भजेत भर्त्रा ॥ उद्भिन्नकं स्यात्प्रमदांघ्रियुग्मे कान्तोरसि स्येस्फुटमान्
प्रदिष्टः ॥१४॥ अथ तिर्यग्बंधः ॥ ॥ कान्तांघ्रिमेकं हृदये स्वकीये निधाय भर्त्रा शयने द्वितीयम् ॥ कुर्यादु
त्तिं वेदिति वीणाख्यः प्रीणंगनायां परिकल्पनीयः ॥१५॥ पार्श्वे प्रसुप्ता प्रमदा तयाथ कान्तः समा
लिंग्य रतिं करोति ॥ यत्र प्रदिष्टो मुनिभिः पुराणैर्बन्धस्तदा संपुटनामधेयः ॥१६॥ यद्यंगना कुंचितपाद
युग्मं स्वनाभिदेशं परिकल्प्य भर्त्रा ॥ रतिं प्रकुर्यादिति कर्कटाख्यं तदा कवीन्द्रैः करणं प्रदिष्टम् ॥१७॥ अ
थोपविष्टबंधः ॥ ॥ प्रेंखाविलासं प्रसभं वहन्त्या विपर्ययाज्जंघयुगस्य नार्याः ॥ यत्रासनं स्यादथ चै
कजंघा विपर्यदूपपदं प्रदिष्टम् ॥१८॥ स्वजानुयुग्मान्तरनिर्गतौ चेद्भुजौ स्वकंठे विनयेन्मृगाक्षी ॥

अ.रं. २७
कान्तोपि कृत्वेति विधिं प्रगच्छेत् तदा बुधैर्वेणुदारिताख्यमुक्तम् ॥१९॥ उक्तप्रकारो यदिदं पतीस्वो भुजौ तु कृत्वा
मणिकूर्परस्यो ॥ स्थिरं रमेते करणं प्रदिष्टं तदा कवीन्द्रैः फणिपाशसंज्ञम् ॥२०॥ निधाय जंघायुगलं युवत्याः स्व
कीययोः कूर्परयोरथास्याः ॥ कंठे स्वबाहू परिणीय गच्छेत्पतिस्तदा संयमनाख्यमेतत् ॥२१॥ मुखे मुखं बाहु
युगे स्वबाहू जंघाद्वये जंघयुगं निधाय ॥ गच्छेत्पतिश्चेदिति कौर्मकं स्यात् ऊर्द्ध्वोरुयुग्मात्परिवर्त्तिताख्य
म् ॥२२॥ स्थितां स्त्रियं कुंचितपादयुग्मां तथैव भर्त्ता कुरुते प्रियां गम् ॥ भजेत वेत्कामकलाविदग्धो बंधं तम
ग्रमपद्मं वदंति ॥२३॥ विलासिनी कूर्परवर्त्तीकं ची स्वकीयां भ्रमयन्गुरुश्चेत् ॥ भजेत भर्त्रैति विमर्द्दितं स्याच्चन्मा
कर्टं संमुखसंगमेन ॥२४॥ अथास्थितबंधः ॥ ॥ संवेष्टयित्वा निजकूर्परे राजा त्वंगनाया अवलंब्य कंठे
॥ रतिं प्रकुर्यादिति कूर्पराख्यो बंधः प्रदिष्टः स च जानुपूर्वः ॥ उक्तप्रकारे करणे यदैकं पादो भवेदूर्द्ध्वगतो
गनायाः ॥ तदा प्रदिष्टो हरिविक्रमाख्यो बंधः प्रियो यं तरुणीजनानाम् ॥२५॥ कंठे भुजाभ्यामव काली
२७

लंब्य भर्त्तुः श्रोणीं निजोरुयुगलेन गाढम् ॥ संवेष्टयेत्कुर्याद्रतिमंगना चेदुक्तः कवीन्द्रैरिति कीर्त्तिबंधः ॥२७॥ अथ पशु
बंधः ॥ ॥ विन्यस्तपाणिपदिग्रियुगाधरणिं अधोमुखी धेनुवदग्रसंस्था ॥ स्त्री स्याद्यथास्याः कटिदेशवर्त्ती भर्त्ता भवे
द्वैनुकमेतदुक्तम् ॥२८॥ अधोमुखी मस्तकदोःकुचांसैर्मंचगता कामति यत्र नारी ॥ करीव भर्त्ता रतिलोलचित्त
स्तदैभसंज्ञं करणं प्रदिष्टम् ॥२९॥ श्वानशौकरकगर्दभादिकान्यप्रयोजककतया च भूरिशः ॥ अप्रसिद्धकरणानि
नो मया दर्शितान्यति विनिंदितानि च ॥३०॥ अथ पुरुषायितबंधः ॥ ॥ जातश्रमं वीक्ष्य नरं पुरंध्री स्वेच्छया त
येवाथ रते घृत्या ॥ कन्दर्पवेगाकुलिता नितान्तं कुर्वीत चेष्टां पुरुषायितं सा ॥३१॥ उत्तानसुप्तं दयितं भुजाभ्या
मालिंग्य लिंगं विनिवेश्य योनौ ॥ भजेन्नितंबं परिचालयन्ती नारी तदासौ विपरीतबंधः ॥३२॥ उपस्थपुंसो
जघनोपरिस्था संभ्रामयत्यंघ्रियुगं विकुंचितम् ॥ चक्राकृतिः स्त्री नरवद्विचेष्टते तद्भ्रामराख्यं करणं प्र
दिष्टम् ॥३३॥ प्रेक्ष्याविभ्रमवती स्मरयंत्रे भर्तृलिंगमुपधाय पुरंध्री ॥ भ्रामयेत्कटिमनंगविलोलास्या

तदाकररामुत्कलितारव्यम् ॥३४॥ विपरीतरतेसुसीत्कृतादरहासातिमनोरमानना ॥ कितवाद्यववशंगतोसि
मेस्मरयुद्धे विजितोसि वाप्पलम् ॥३५॥ इतिमंजुवदत्यपघ्याकुलासकचाकर्षणाचुंविताधरा ॥ श्रमसंमी
लितौसुलोचना इवतांयाति विलासिनीतदा ॥३६॥ अथदेहलतांसमूर्छनांदरसंमीलितलोचनोत्पलाम् ॥ सम
वेक्ष्यनितान्तनिःसहामवगच्छेद्वलांद्रुतामिति ॥३७॥ करिणींहरिणीं चगर्भिणींनवसूतांऋतुयोगिनींकृशा
म् ॥ज्वरितांवकुमारिकांरते विपरीतेपरिवर्जयेत्सुधीः ॥३८॥ अथकरताडनसीत्कृतोद्देशः ॥ ॥ कामयु
द्धंगयुग्मंस्यात्करताडनसीत्कृते ॥ तत्ताडनंचतुर्धोक्तंसीत्कृतंपंचधास्मृतम् ॥३९॥ प्रसृतेनापहस्तेनमु
ष्टिनासमपाणिना ॥ ताडनंस्याच्चतुर्धैवंतस्यस्थानानिसंभुवे ॥४०॥ पार्श्वेगण्डेसमतलंमुष्टिंपृष्ठेचवक्ष
नि ॥ फणाकारंप्रसृतिकं पुंज्याद्धृदयपहस्तकम् ॥४१॥ अथताडनभेदाः ॥ ॥ विपरीतरतेयदांगनाहृ
दिमुष्ट्यापरिताडयेत्पतिम् ॥ करघातनकंतदावुधैरितिसन्तानितसंज्ञमुच्यते ॥४२॥ विस्तीर्णहस्तेन

रतौयदास्त्रीहन्यात्पतिंसासपताकसंज्ञः ॥ अंगुष्ठकेनैववकृतप्रहारैर्विज्ञैःसउक्तःखलुविन्दुमालः ॥४३॥
सांगुष्ठमध्यांगुलिकाप्रहारैःशनैःपुरंध्रीकुरुतेतिरागात् ॥ यद्येषउक्तःकविभिःप्रगल्भोरानन्दकुं
उलनामधेयः ॥४४॥ अथसीत्कृतभेदास्तुपंचैववक्रमतोध्रुवे ॥ हिंकृतंस्तनितंसीत्कमुत्कृतंफूत्कृतंतथा ॥४५॥
उच्चारोमुखनासाभ्यांहिंकृतंचाभिजायते ॥ स्तनितंमेघगंभीरघोषवत्स्यात्ततःस्मृतम् ॥४६॥ फूत्कृतं
ततुभुजगोच्छ्वासवत्स्यात्पोत्कृतम् ॥ वेणुविस्फोटनाराचतुल्यंस्याद्दधतत्कृतम् ॥४७॥ मेघबिन्दुर्यदातो
यंनिपतेत्तद्वाकृतिः ॥ सीत्कृतस्येतिपंचैववक्रमाद्भेदाःसमीरिताः ॥४८॥ लावककोकिलमयूरहंसिकानील
कंठकृतसन्निभान्क्रमात् ॥ संदधातिकिलहिंकृतादिकांश्चित्रभोगसमयेविलासिनी ॥४९॥ सुरतेदशनक्ष
दंयदाप्रमदायाःपरिरम्भतेभृशम् ॥ दयितेनततापितागतःक्रियतेसीत्कृतमंजसातया ॥५०॥ अथाष्ट
नायिकालक्षणानि ॥ ॥ निखिलसुरतखेदैरंकितांगःसपत्न्याअनुगतरुग्णानेत्रोनिद्रयाजीवितेशः ॥

अ·रं·
२६

समयमधुरवाक्यंप्रातरभ्येतियस्याःकथयतिसुकवित्तांखण्डितांत्वांपुरंध्रीं ॥५१॥ विनीताभ्रुभवासवेश्मनिम्य
दुराख्यामधिवासिनीनिशि ॥ पतिमार्गविरापितेक्षणाकथितावासकसज्जिताबुधैः ॥५२॥ मागस्त्यावारण
गंदयितंप्रचण्डैर्वाक्यैर्निरस्यबहुकोपतएवपश्चात् ॥ संजायतेविरहतापविलापदीनायातांवदन्तिकल
हान्तरितांकवीन्द्राः ॥५३॥ मदनाकुलितातिनिर्भयीकृतभूषाणिनिगूढचारिणी ॥ सुरतायपरालयेव्र
जेत्कवयस्तामभिसारिकांविदुः ॥५४॥ प्रियतममुपनेतुंप्रेषयित्वैवदूतींस्वयमतिरतिलोलायातिसं
केतदेशम् ॥ तदनुपतिविहीनामार्गतांवीक्ष्ययातांवहतिविकलतापंसोच्यतेविप्रलब्धा ॥५५॥ दयितेपरदे
शसंस्थितेशशिपंकेरुहचंदनादिभिः ॥ परितप्यतएवयद्वपुःकथितासाकविभिर्वियोगिनी ॥५६॥ वैशि
ष्यवान्स्वकलकेलिकलापेकान्तोजहातिनसकाशमनंगलौल्यात् ॥ यस्याःस्त्रियःसुरतसौख्यविवशि
तासास्वाधीनपूर्वपतिकेतिबुधैःप्रदिष्टा ॥५७॥ विविधकुसुममालाभूषितांगीमनोज्ञासुरतरसविलो

काली
२६

कला २

अ·रं·
३१

लासानुरागास्वकान्ते ॥ निवसतिहरिणाक्षीवासगेहेचिरंयावरकविभिरिहोक्तासाकिलोत्कंठितेति ॥५८॥ इत्य
ष्टनायिकालक्षणानि ॥ ॥ सुविदितपरमार्थःकामशास्त्रस्यविद्वान्विविधरतिविनोदैःकामिनीनांमनांसि
॥ अनुदिनमनुरागाद्रंजयेद्यःसलीलंफलमविकलमेवप्राप्नुयाज्जन्मनःसः ॥५९॥ यावच्चन्द्रकरमौलिगा
सुरनदीगौरीतदर्द्धांगगायावत्प्रेमवतीपयोधितनयावैकुण्ठसंगेरता ॥ वेदाभ्यासरतोविरिंचिरपिभूर्या
वद्दिनेशःशशीभूयात्तावदनंगरंगकइतिप्रीत्यैसदाकामिनाम् ॥६०॥ ॥ इतिश्रीमल्लाडखानमल्लू
विनोदायमहाकविकल्याणमल्लविरचितेऽनंगरंगेसुरतभेदादिनिरूपणंनामदशमंस्थलम् ॥१०॥
॥ ॥ कामशास्त्रविदःप्राज्ञाभवन्तिरमणीप्रियाः ॥ कामशास्त्रमजानन्तोरमन्तेपशुवत्स्त्रियः ॥१॥ नानावि
चित्रैःसुरतोपचारैःक्रीडासुखंजन्मफलंनराणाम् ॥ किंसौरभेयीशतमध्यवर्तीधिक्बोधितंभोगसु
खंनभुंक्ते ॥२॥ ॥ श्रीशके ७२८ ज्यैष्ठकृष्णत्रयोदश्यांशनौदुर्गानाथशर्मणानंगरंगोलिखितः ॥ ॥

काली

श्रीदुर्गानाथसूरिसूनुलक्ष्मीलालशर्मणोदःपुलम् ॥ ॥

आलोलामलकावलीं विलुलितां विभ्रच्चलत्कुण्डलं किञ्चिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसां सीकरैः ॥
तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥ १ ॥